श्री लक्ष्मी सहस्रनामावळिः

1. ॐ नित्यागतायै नमः
2. ॐ अनंतनित्यायै नमः
3. ॐ नंदिन्यै नमः
4. ॐ जनरंजन्यै नमः
5. ॐ नित्यप्रकाशिन्यै नमः
6. ॐ स्वप्रकाशस्वरूपिण्यै नमः
7. ॐ महालक्ष्म्यै नमः
8. ॐ महाकाळ्यै नमः
9. ॐ महाकन्यायै नमः
10. ॐ सरस्वत्यै नमः ||10||
11. ॐ भोगवैभवसंधात्र्यै नमः
12. ॐ भक्तानुग्रहकारिण्यै नमः
13. ॐ ईशावास्यायै नमः
14. ॐ महामायायै नमः
15. ॐ महादेव्यै नमः
16. ॐ महेश्वर्यै नमः
17. ॐ ह्रल्लेखायै नमः
18. ॐ परमायै नमः
19. ॐ शक्तये नमः
20. ॐ मातृकाबीजरुपिण्यै नमः ||20||
21. ॐ नित्यानंदायै नमः
22. ॐ नित्यबोधायै नमः
23. ॐ नादिन्यै नमः
24. ॐ जनमोदिन्यै नमः
25. ॐ सत्यप्रत्ययिन्यै नमः
26. ॐ स्वप्रकाशात्मरूपिण्यै नमः
27. ॐ त्रिपुरायै नमः

28. ॐ भैरव्यै नमः
29. ॐ विद्यायै नमः
30. ॐ हंसायै नमः ||30||
31. ॐ वागीश्वर्यै नमः
32. ॐ शिवायै नमः
33. ॐ वाग्देव्यै नमः
34. ॐ महारात्र्यै नमः
35. ॐ कालरात्र्यै नमः
36. ॐ त्रिलोचनायै नमः
37. ॐ भद्रकाळ्यै नमः
38. ॐ कराळ्यै नमः
39. ॐ महाकाळ्यै नमः
40. ॐ तिलोत्तमायै नमः ||40||
41. ॐ काळ्यै नमः
42. ॐ कराळवक्त्रांतायै नमः
43. ॐ कामाक्ष्यै नमः
44. ॐ कामदायै नमः
45. ॐ शुभायै नमः
46. ॐ चंडिकायै नमः
47. ॐ चंडरूपेशायै नमः
48. ॐ चामुंडायै नमः
49. ॐ चक्रधारिण्यै नमः
50. ॐ त्रैलोक्यजनन्यै नमः ||50||
51. ॐ देव्यै नमः
52. ॐ त्रैलोक्यविजयोत्तमायै नमः
53. ॐ सिद्धलक्ष्म्यै नमः
54. ॐ क्रियालक्ष्म्यै नमः
55. ॐ मोक्षलक्ष्म्यै नमः
56. ॐ प्रसादिन्यै नमः

57. ॐ उमायै नमः
58. ॐ भगवत्यै नमः
59. ॐ दुर्गायै नमः
60. ॐ चांद्र्यै नमः ||60||
61. ॐ दाक्षायण्यै नमः
62. ॐ प्रत्यंगिरायै नमः
63. ॐ धरायै नमः
64. ॐ वेलायै नमः
65. ॐ लोकमात्रे नमः
66. ॐ हरिप्रियायै नमः
67. ॐ पार्वत्यै नमः
68. ॐ परमायै नमः
69. ॐ देव्यै नमः
70. ॐ ब्रह्मविद्याप्रदायिन्यै नमः ||70||
71. ॐ अरूपायै नमः
72. ॐ बहुरूपायै नमः
73. ॐ विरूपायै नमः
74. ॐ विश्वरूपिण्यै नमः
75. ॐ पंचभूतात्मिकायै नमः
76. ॐ परायै नमः
77. ॐ काळ्यै नमः
78. ॐ मायै नमः
79. ॐ पंचिकायै नमः
80. ॐ वाग्म्यै नमः ||80||
81. ॐ हविःप्रत्यधिदेवतायै नमः
82. ॐ देवमात्रे नमः
83. ॐ सुरेशानायै नमः
84. ॐ वेदगर्भायै नमः
85. ॐ अंबिकायै नमः

86. ॐ धृत्यै नमः
87. ॐ संख्यायै नमः
88. ॐ जातये नमः
89. ॐ क्रियाशक्त्यै नमः
90. ॐ प्रकृत्यै नमः ||90||
91. ॐ मोहिन्यै नमः
92. ॐ मह्यै नमः
93. ॐ यज्ञविद्यायै नमः
94. ॐ महाविद्यायै नमः
95. ॐ गुह्यविद्यायै नमः
96. ॐ विभावर्यै नमः
97. ॐ ज्योतिष्मत्यै नमः
98. ॐ महामात्रे नमः
99. ॐ सर्वमंत्रफलप्रदायै नमः
100. ॐ दारिद्र्यध्वंसिन्यै नमः ||100||
101. ॐ देव्यै नमः
102. ॐ हृदयग्रंथिभेदिन्यै नमः
103. ॐ सहस्रादित्यसंकाशायै नमः
104. ॐ चंद्रिकायै नमः
105. ॐ चंद्ररूपिण्यै नमः
106. ॐ गायत्र्यै नमः
107. ॐ सोमसंभूत्यै नमः
108. ॐ सावित्र्यै नमः
109. ॐ प्रणवात्मिकायै नमः
110. ॐ शांकर्यै नमः ||110||
111. ॐ वैष्णव्यै नमः
112. ॐ ब्राह्म्यै नमः
113. ॐ सर्वदेवनमस्कृतायै नमः
114. ॐ सेव्यदुर्गायै नमः

115. ॐ कुबेराक्ष्यै नमः
116. ॐ करवीरनिवासिन्यै नमः
117. ॐ जयायै नमः
118. ॐ विजयायै नमः
119. ॐ जयंत्यै नमः
120. ॐ अपराजितायै नमः ||120||
121. ॐ कुब्जिकायै नमः
122. ॐ काळिकायै नमः
123. ॐ शास्त्र्यै नमः
124. ॐ वीणापुस्तकधारिण्यै नमः
125. ॐ सर्वज्ञशक्त्यै नमः
126. ॐ श्रीशक्त्यै नमः
127. ॐ ब्रह्मविष्णुशिवात्मिकायै नमः
128. ॐ इडापिंगळिकामध्यमृणाळीतंतुरुपिण्यै नमः
129. ॐ यज्ञेशान्यै नमः
130. ॐ प्रथायै नमः ||130||
131. ॐ दीक्षायै नमः
132. ॐ दक्षिणायै नमः
133. ॐ सर्वमोहिन्यै नमः
134. ॐ अष्टांगयोगिन्यै नमः
135. ॐ देव्यै नमः
136. ॐ निर्बीजध्यानगोचरायै नमः
137. ॐ सर्वतीर्थस्थितायै नमः
138. ॐ शुद्धायै नमः
139. ॐ सर्वपर्वतवासिन्यै नमः
140. ॐ वेदशास्त्रप्रमायै नमः ||140||
141. ॐ देव्यै नमः
142. ॐ षडंगादिपदक्रमायै नमः
143. ॐ शिवायै नमः

144. ॐ धात्र्यै नमः
145. ॐ शुभानंदायै नमः
146. ॐ यज्ञकर्मस्वरूपिण्यै नमः
147. ॐ व्रतिन्यै नमः
148. ॐ मेनकायै नमः
149. ॐ देव्यै नमः
150. ॐ ब्रह्माण्यै नमः ||150||
151. ॐ ब्रह्मचारिण्यै नमः
152. ॐ एकाक्षरपरायै नमः
153. ॐ तारायै नमः
154. ॐ भवबंधविनाशिन्यै नमः
155. ॐ विश्वंभरायै नमः
156. ॐ धराधारायै नमः
157. ॐ निराधारायै नमः
158. ॐ अधिकस्वरायै नमः
159. ॐ राकायै नमः
160. ॐ कुह्वै नमः ||160||
161. ॐ अमावास्यायै नमः
162. ॐ पूर्णिमायै नमः
163. ॐ अनुमत्यै नमः
164. ॐ द्युतये नमः
165. ॐ सिनीवाल्यै नमः
166. ॐ शिवायै नमः
167. ॐ अवश्यायै नमः
168. ॐ वैश्वदेव्यै नमः
169. ॐ पिशंगिलायै नमः
170. ॐ पिप्पलायै नमः ||170||
171. ॐ विशालाक्ष्यै नमः
172. ॐ रक्षोघ्न्यै नमः

173. ॐ वृष्टिकारिण्यै नमः
174. ॐ दुष्टविद्राविण्यै नमः
175. ॐ देव्यै नमः
176. ॐ सर्वोपद्रवनाशिन्यै नमः
177. ॐ शारदायै नमः
178. ॐ शरसंधानायै नमः
179. ॐ सर्वशस्त्रस्वरूपिण्यै नमः
180. ॐ युद्धमध्यस्थितायै नमः ||180||
181. ॐ देव्यै नमः
182. ॐ सर्वभूतप्रभंजन्यै नमः
183. ॐ अयुद्धायै नमः
184. ॐ युद्धरूपायै नमः
185. ॐ शांतायै नमः
186. ॐ शांतिस्वरूपिण्यै नमः
187. ॐ गंगायै नमः
188. ॐ सरस्वतीवेणीयमुनानर्मदापगायै नमः
189. ॐ समुद्रवसनावासायै नमः
190. ॐ ब्रह्मांडश्रेणिमेखलायै नमः ||190||
191. ॐ पंचवक्त्रायै नमः
192. ॐ दशभुजायै नमः
193. ॐ शुद्धस्फटिकसन्निभायै नमः
194. ॐ रक्तायै नमः
195. ॐ कृष्णायै नमः
196. ॐ सितायै नमः
197. ॐ पीतायै नमः
198. ॐ सर्ववर्णायै नमः
199. ॐ निरीश्वर्यै नमः
200. ॐ काळिकायै नमः ||200||
201. ॐ चक्रिकायै नमः

202. ॐ देव्यै नमः
203. ॐ सत्यायै नमः
204. ॐ बटुकास्थितायै नमः
205. ॐ तरुण्यै नमः
206. ॐ वारुण्यै नमः
207. ॐ नार्यै नमः
208. ॐ ज्येष्ठादेव्यै नमः
209. ॐ सुरेश्वर्यै नमः
210. ॐ विश्वंभराधरायै नमः ||210||
211. ॐ कर्त्र्यै नमः
212. ॐ गलार्गळविभंजन्यै नमः
213. ॐ संध्यारात्रिर्दिवाज्योत्स्नायै नमः
214. ॐ कलाकाष्ठायै नमः
215. ॐ निमेषिकायै नमः
216. ॐ उर्व्यै नमः
217. ॐ कात्यायन्यै नमः
218. ॐ शुभ्रायै नमः
219. ॐ संसारार्णवतारिण्यै नमः
220. ॐ कपिलायै नमः ||220||
221. ॐ कीलिकायै नमः
222. ॐ अशोकायै नमः
223. ॐ मल्लिकानवमल्लिकायै नमः
224. ॐ देविकायै नमः
225. ॐ नंदिकायै नमः
226. ॐ शांतायै नमः
227. ॐ भंजिकायै नमः
228. ॐ भयभंजिकायै नमः
229. ॐ कौशिक्यै नमः
230. ॐ वैदिक्यै नमः ||230||

231. ॐ देव्यै नमः
232. ॐ सौर्यै नमः
233. ॐ रूपाधिकायै नमः
234. ॐ अतिभायै नमः
235. ॐ दिग्वस्त्रायै नमः
236. ॐ नववस्त्रायै नमः
237. ॐ कन्यकायै नमः
238. ॐ कमलोद्भवायै नमः
239. ॐ श्रियै नमः
240. ॐ सौम्यलक्षणायै नमः ||240||
241. ॐ अतीतदुर्गायै नमः
242. ॐ सूत्रप्रबोधिकायै नमः
243. ॐ श्रद्धायै नमः
244. ॐ मेधायै नमः
245. ॐ कृतये नमः
246. ॐ प्रज्ञायै नमः
247. ॐ धारणायै नमः
248. ॐ कांत्यै नमः
249. ॐ श्रुतये नमः
250. ॐ स्मृतये नमः ||250||
251. ॐ धृतये नमः
252. ॐ धन्यायै नमः
253. ॐ भूतये नमः
254. ॐ इष्ट्यै नमः
255. ॐ मनीषिण्यै नमः
256. ॐ विरक्तये नमः
257. ॐ व्यापिन्यै नमः
258. ॐ मायायै नमः
259. ॐ सर्वमायाप्रभंजन्यै नमः

260. ॐ माहेंद्र्यै नमः ||260||
261. ॐ मंत्रिण्यै नमः
262. ॐ सिंह्यै नमः
263. ॐ इंद्रजालस्वरूपिण्यै नमः
264. ॐ अवस्थात्रयनिर्मुक्तायै नमः
265. ॐ गुणत्रयविवर्जितायै नमः
266. ॐ ईषणत्रयनिर्मुक्तायै नमः
267. ॐ सर्वरोगविवर्जितायै नमः
268. ॐ योगिध्यानांतगम्यायै नमः
269. ॐ योगध्यानपरायणायै नमः
270. ॐ त्रयीशिखायै नमः ||270||
271. ॐ विशेषज्ञायै नमः
272. ॐ वेदांतज्ञानरुपिण्यै नमः
273. ॐ भारत्यै नमः
274. ॐ कमलायै नमः
275. ॐ भाषायै नमः
276. ॐ पद्मायै नमः
277. ॐ पद्मवत्यै नमः
278. ॐ कृतये नमः
279. ॐ गौतम्यै नमः
280. ॐ गोमत्यै नमः ||280||
281. ॐ गौर्यै नमः
282. ॐ ईशानायै नमः
283. ॐ हंसवाहिन्यै नमः
284. ॐ नारायण्यै नमः
285. ॐ प्रभाधारायै नमः
286. ॐ जाह्नव्यै नमः
287. ॐ शंकरात्मजायै नमः
288. ॐ चित्रघंटायै नमः

289. ॐ सुनंदायै नमः
290. ॐ श्रियै नमः ||290||
291. ॐ मानव्यै नमः
292. ॐ मनुसंभवायै नमः
293. ॐ स्तंभिन्यै नमः
294. ॐ क्षोभिण्यै नमः
295. ॐ मार्यै नमः
296. ॐ भ्रामिण्यै नमः
297. ॐ शत्रुमारिण्यै नमः
298. ॐ मोहिन्यै नमः
299. ॐ द्वेषिण्यै नमः
300. ॐ वीरायै नमः ||300||
301. ॐ अघोरायै नमः
302. ॐ रुद्ररूपिण्यै नमः
303. ॐ रुद्रैकादशिन्यै नमः
304. ॐ पुण्यायै नमः
305. ॐ कल्याण्यै नमः
306. ॐ लाभकारिण्यै नमः
307. ॐ देवदुर्गायै नमः
308. ॐ महादुर्गायै नमः
309. ॐ स्वप्नदुर्गायै नमः
310. ॐ अष्टभैरव्यै नमः ||310||
311. ॐ सूर्यचंद्राग्निरूपायै नमः
312. ॐ ग्रहनक्षत्ररूपिण्यै नमः
313. ॐ बिंदुनादकळातीतायै नमः
314. ॐ बिंदुनादकळात्मिकायै नमः
315. ॐ दशवायुजयाकारायै नमः
316. ॐ कळाषोडशसंयुतायै नमः
317. ॐ काश्यप्यै नमः

318. ॐ कमलादेव्यै नमः
319. ॐ नादचक्रनिवासिन्यै नमः
320. ॐ मृडाधारायै नमः ||320||
321. ॐ स्थिरायै नमः
322. ॐ गुह्यायै नमः
323. ॐ देविकायै नमः
324. ॐ चक्ररूपिण्यै नमः
325. ॐ अविद्यायै नमः
326. ॐ शार्वर्यै नमः
327. ॐ भुंजायै नमः
328. ॐ जंभासुरनिबर्हिण्यै नमः
329. ॐ श्रीकायायै नमः
330. ॐ श्रीकलायै नमः ||330||
331. ॐ शुभ्रायै नमः
332. ॐ कर्मनिर्मूलकारिण्यै नमः
333. ॐ आदिलक्ष्म्यै नमः
334. ॐ गुणाधारायै नमः
335. ॐ पंचब्रह्मात्मिकायै नमः
336. ॐ परायै नमः
337. ॐ श्रुतये नमः
338. ॐ ब्रह्ममुखावासायै नमः
339. ॐ सर्वसंपत्तिरूपिण्यै नमः
340. ॐ मृतसंजीवन्यै नमः ||340||
341. ॐ मैत्र्यै नमः
342. ॐ कामिन्यै नमः
343. ॐ कामवर्जितायै नमः
344. ॐ निर्वाणमार्गदायै नमः
345. ॐ देव्यै नमः
346. ॐ हंसिन्यै नमः

347. ॐ काशिकायै नमः
348. ॐ क्षमायै नमः
349. ॐ सपर्यायै नमः
350. ॐ गुणिन्यै नमः ||350||
351. ॐ भिन्नायै नमः
352. ॐ निर्गुणायै नमः
353. ॐ खंडिताशुभायै नमः
354. ॐ स्वामिन्यै नमः
355. ॐ वेदिन्यै नमः
356. ॐ शक्यायै नमः
357. ॐ शांबर्यै नमः
358. ॐ चक्रधारिण्यै नमः
359. ॐ दंडिन्यै नमः
360. ॐ मुंडिन्यै नमः ||360||
361. ॐ व्याघ्र्यै नमः
362. ॐ शिखिन्यै नमः
363. ॐ सोमसंहतये नमः
364. ॐ चिंतामणये नमः
365. ॐ चिदानंदायै नमः
366. ॐ पंचबाणप्रबोधिन्यै नमः
367. ॐ बाणश्रेणये नमः
368. ॐ सहस्राक्ष्यै नमः
369. ॐ सहस्रभुजपादुकायै नमः
370. ॐ संध्यावलये नमः ||370||
371. ॐ त्रिसंध्याख्यायै नमः
372. ॐ ब्रह्मांडमणिभूषणायै नमः
373. ॐ वासव्यै नमः
374. ॐ वारुणीसेनायै नमः
375. ॐ कुलिकायै नमः

376. ॐ मंत्ररंजिन्यै नमः
377. ॐ जितप्राणस्वरूपायै नमः
378. ॐ कांतायै नमः
379. ॐ काम्यवरप्रदायै नमः
380. ॐ मंत्रब्राह्मणविद्यार्थायै नमः ||380||
381. ॐ नादरुपायै नमः
382. ॐ हविष्मत्यै नमः
383. ॐ आथर्वणिः श्रुतयै नमः
384. ॐ शून्यायै नमः
385. ॐ कल्पनावर्जितायै नमः
386. ॐ सत्यै नमः
387. ॐ सत्ताजातये नमः
388. ॐ प्रमायै नमः
389. ॐ अमेयायै नमः
390. ॐ अप्रमितये नमः ||390||
391. ॐ प्राणदायै नमः
392. ॐ गतये नमः
393. ॐ अवर्णायै नमः
394. ॐ पंचवर्णायै नमः
395. ॐ सर्वदायै नमः
396. ॐ भुवनेश्वर्यै नमः
397. ॐ त्रैलोक्यमोहिन्यै नमः
398. ॐ विद्यायै नमः
399. ॐ सर्वभर्त्र्यै नमः
400. ॐ क्षरायै नमः ||400||
401. ॐ अक्षरायै नमः
402. ॐ हिरण्यवर्णायै नमः
403. ॐ हरिण्यै नमः
404. ॐ सर्वोपद्रवनाशिन्यै नमः

405. ॐ कैवल्यपदवीरेखायै नमः
406. ॐ सूर्यमंडलसंस्थितायै नमः
407. ॐ सोममंडलमध्यस्थायै नमः
408. ॐ वह्निमंडलसंस्थितायै नमः
409. ॐ वायुमंडलमध्यस्थायै नमः
410. ॐ व्योममंडलसंस्थितायै नमः ||410||
411. ॐ चक्रिकायै नमः
412. ॐ चक्रमध्यस्थायै नमः
413. ॐ चक्रमार्गप्रवर्तिन्यै नमः
414. ॐ कोकिलाकुलचक्रेशायै नमः
415. ॐ पक्षतये नमः
416. ॐ पंक्तिपावनायै नमः
417. ॐ सर्वसिद्धांतमार्गस्थायै नमः
418. ॐ षड्वर्णावरवर्जितायै नमः
419. ॐ शतरुद्रहरायै नमः
420. ॐ हंत्र्यै नमः ||420||
421. ॐ सर्वसंहारकारिण्यै नमः
422. ॐ पुरुषायै नमः
423. ॐ पौरुष्यै नमः
424. ॐ तुष्टये नमः
425. ॐ सर्वतंत्रप्रसूतिकायै नमः
426. ॐ अर्धनारीश्वर्यै नमः
427. ॐ देव्यै नमः
428. ॐ सर्वविद्याप्रदायिन्यै नमः
429. ॐ भार्गव्यै नमः
430. ॐ याजुषीविद्यायै नमः ||430||
431. ॐ सर्वोपनिषदास्थितायै नमः
432. ॐ व्योमकेशायै नमः
433. ॐ अखिलप्राणायै नमः

434. ॐ पंचकोशविलक्षणायै नमः
435. ॐ पंचकोशात्मिकायै नमः
436. ॐ प्रतीचे नमः
437. ॐ पंचब्रह्मात्मिकायै नमः
438. ॐ शिवायै नमः
439. ॐ जगज्जराजनित्र्यै नमः
440. ॐ पंचकर्मप्रसूतिकायै नमः ||440||
441. ॐ वाग्देव्यै नमः
442. ॐ आभरणाकारायै नमः
443. ॐ सर्वकाम्यस्थितास्थितये नमः
444. ॐ अष्टादशचतुःषष्टिपीठिकाविद्यायुतायै नमः
445. ॐ कालिकाकर्षणश्यामायै नमः
446. ॐ यक्षिण्यै नमः
447. ॐ किन्नरेश्वर्यै नमः
448. ॐ केतक्यै नमः
449. ॐ मल्लिकायै नमः
450. ॐ अशोकायै नमः ||450||
451. ॐ वाराह्यै नमः
452. ॐ धरण्यै नमः
453. ॐ ध्रुवायै नमः
454. ॐ नारसिंह्यै नमः
455. ॐ महोग्रास्यायै नमः
456. ॐ भक्तानामार्तिनाशिन्यै नमः
457. ॐ अंतर्बलायै नमः
458. ॐ स्थिरायै नमः
459. ॐ लक्ष्म्यै नमः
460. ॐ जरामरणनाशिन्यै नमः ||460||
461. ॐ श्रीरंजितायै नमः
462. ॐ महाकायायै नमः

463. ॐ सोमसूर्याग्निलोचनायै नमः
464. ॐ अदितये नमः
465. ॐ देवमात्रे नमः
466. ॐ अष्टपुत्रायै नमः
467. ॐ अष्टयोगिन्यै नमः
468. ॐ अष्टप्रकृतये नमः
469. ॐ अष्टाष्टविभ्राजद्विकृताकृतये नमः
470. ॐ दुर्भिक्षध्वंसिन्यै नमः ||470||
471. ॐ सीतायै नमः
472. ॐ सत्यायै नमः
473. ॐ रुक्मिण्यै नमः
474. ॐ ख्यातिजायै नमः
475. ॐ भार्गव्यै नमः
476. ॐ देवयोनये नमः
477. ॐ तपस्विन्यै नमः
478. ॐ शाकंभर्यै नमः
479. ॐ महाशोणायै नमः
480. ॐ गरुडोपरिसंस्थितायै नमः ||480||
481. ॐ सिंहगायै नमः
482. ॐ व्याघ्रगायै नमः
483. ॐ वायुगायै नमः
484. ॐ महाद्रिगायै नमः
485. ॐ अकारादिक्षकारांतायै नमः
486. ॐ सर्वविद्याधिदेवतायै नमः
487. ॐ मंत्रव्याख्याननिपुणायै नमः
488. ॐ ज्योतिशास्त्रैकलोचनायै नमः
489. ॐ इडापिंगळिकामध्यसुषुम्नायै नमः
490. ॐ ग्रंथिभेदिन्यै नमः ||490||
491. ॐ कालचक्राश्रयोपेतायै नमः

492. ॐ कालचक्रस्वरूपिण्यै नमः
493. ॐ वैशारद्यै नमः
494. ॐ मतिश्रेष्ठायै नमः
495. ॐ वरिष्ठायै नमः
496. ॐ सर्वदीपिकायै नमः
497. ॐ वैनायक्यै नमः
498. ॐ वरारोहायै नमः
499. ॐ श्रोणिवेलायै नमः
500. ॐ बहिर्वळये नमः ||500||
501. ॐ जंभिन्यै नमः
502. ॐ जृंभिण्यै नमः
503. ॐ जंभकारिण्यै नमः
504. ॐ गणकारिकायै नमः
505. ॐ शरण्यै नमः
506. ॐ चक्रिकायै नमः
507. ॐ अनंतायै नमः
508. ॐ सर्वव्याधिचिकित्सक्यै नमः
509. ॐ देवक्यै नमः
510. ॐ देवसंकाशायै नमः ||510||
511. ॐ वारिधये नमः
512. ॐ करुणाकरायै नमः
513. ॐ शर्वर्यै नमः
514. ॐ सर्वसंपन्नायै नमः
515. ॐ सर्वपापप्रभंजन्यै नमः
516. ॐ एकमात्रायै नमः
517. ॐ द्विमात्रायै नमः
518. ॐ त्रिमात्रायै नमः
519. ॐ अपरायै नमः
520. ॐ अर्धमात्रायै नमः ||520||

521. ॐ परायै नमः
522. ॐ सूक्ष्मायै नमः
523. ॐ सूक्ष्मार्थार्थपरायै नमः
524. ॐ एकवीरायै नमः
525. ॐ विशेषाख्यायै नमः
526. ॐ षष्ठीदेव्यै नमः
527. ॐ मनस्विन्यै नमः
528. ॐ नैष्कर्म्यायै नमः
529. ॐ निष्कलालोकायै नमः
530. ॐ ज्ञानकर्माधिकायै नमः ||530||
531. ॐ गुणायै नमः
532. ॐ सबंध्वानंदसंदोहायै नमः
533. ॐ व्योमाकारायै नमः
534. ॐ अनिरूपितायै नमः
535. ॐ गद्यपद्यात्मिकायै नमः
536. ॐ वाण्यै नमः
537. ॐ सर्वालंकारसंयुतायै नमः
538. ॐ साधुबंधपदन्यासायै नमः
539. ॐ सर्वौकसे नमः
540. ॐ घटिकावळये नमः ||540||
541. ॐ षट्कर्मिण्यै नमः
542. ॐ कर्कशाकारायै नमः
543. ॐ सर्वकर्मविवर्जितायै नमः
544. ॐ आदित्यवर्णायै नमः
545. ॐ अपर्णायै नमः
546. ॐ कामिन्यै नमः
547. ॐ वररूपिण्यै नमः
548. ॐ ब्रह्माण्यै नमः
549. ॐ ब्रह्मसंतानायै नमः

550. ॐ वेदवागीश्वर्यै नमः ||550||
551. ॐ शिवायै नमः
552. ॐ पुराणन्यायमीमांसाधर्मशास्त्रागमश्रुतायै नमः
553. ॐ सद्योवेदवत्यै नमः
554. ॐ सर्वायै नमः
555. ॐ हंस्यै नमः
556. ॐ विद्याधिदेवतायै नमः
557. ॐ विश्वेश्वर्यै नमः
558. ॐ जगद्धात्र्यै नमः
559. ॐ विश्वनिर्माणकारिण्यै नमः
560. ॐ वैदिक्यै नमः ||560||
561. ॐ वेदरूपायै नमः
562. ॐ कालिकायै नमः
563. ॐ कालरूपिण्यै नमः
564. ॐ नारायण्यै नमः
565. ॐ महादेव्यै नमः
566. ॐ सर्वतत्त्वप्रवर्तिन्यै नमः
567. ॐ हिरण्यवर्णरूपायै नमः
568. ॐ हिरण्यपदसंभवायै नमः
569. ॐ कैवल्यपदव्यै नमः
570. ॐ पुण्यायै नमः ||570||
571. ॐ कैवल्यज्ञानलक्षितायै नमः
572. ॐ ब्रह्मसंपत्तिरूपायै नमः
573. ॐ ब्रह्मसंपत्तिकारिण्यै नमः
574. ॐ वारुण्यै नमः
575. ॐ वारुणाराध्यायै नमः
576. ॐ सर्वकर्मप्रवर्तिन्यै नमः
577. ॐ एकाक्षरपरायै नमः
578. ॐ अयुक्तायै नमः

579. ॐ सर्वदारिद्र्यभंजिन्यै नमः
580. ॐ पाशांकुशान्वितायै नमः ||580||
581. ॐ दिव्यायै नमः
582. ॐ वीणाव्याख्याक्षसूत्रभृते नमः
583. ॐ एकमूर्त्यै नमः
584. ॐ त्रयीमूर्त्यै नमः
585. ॐ मधुकैटभभंजन्यै नमः
586. ॐ सांख्यायै नमः
587. ॐ सांख्यवत्यै नमः
588. ॐ ज्वालायै नमः
589. ॐ ज्वलंत्यै नमः
590. ॐ कामरूपिण्यै नमः ||590||
591. ॐ जाग्रंत्यै नमः
592. ॐ सर्वसंपत्तये नमः
593. ॐ सुषुप्तायै नमः
594. ॐ स्वेष्टदायिन्यै नमः
595. ॐ कपालिन्यै नमः
596. ॐ महादंष्ट्रायै नमः
597. ॐ भ्रुकुटीकुटिलाननायै नमः
598. ॐ सर्वावासायै नमः
599. ॐ सुवासायै नमः
600. ॐ बृहत्यै नमः ||600||
601. ॐ अष्टये नमः
602. ॐ शक्वर्यै नमः
603. ॐ छंदोगणप्रतिष्ठायै नमः
604. ॐ कल्माष्यै नमः
605. ॐ करुणात्मिकायै नमः
606. ॐ चक्षुष्मत्यै नमः
607. ॐ महाघोषायै नमः

608. ॐ खड्गचर्मधरायै नमः
609. ॐ अशनये नमः
610. ॐ शिल्पवैचित्र्यविद्योतायै नमः ||610||
611. ॐ सर्वतोभद्रवासिन्यै नमः
612. ॐ अचिंत्यलक्षणाकारायै नमः
613. ॐ सूत्रभाष्यनिबंधनायै नमः
614. ॐ सर्ववेदार्थसंपत्तये नमः
615. ॐ सर्वशास्त्रार्थमातृकायै नमः
616. ॐ अकारादिक्षकारांतसर्ववर्णकृतस्थलायै नमः
617. ॐ सर्वलक्ष्म्यै नमः
618. ॐ सदानंदायै नमः
619. ॐ सारविद्यायै नमः
620. ॐ सदाशिवायै नमः ||620||
621. ॐ सर्वज्ञायै नमः
622. ॐ सर्वशक्त्यै नमः
623. ॐ खेचरीरूपगायै नमः
624. ॐ उच्छ्रितायै नमः
625. ॐ अणिमादिगुणोपेतायै नमः
626. ॐ पराकाष्ठायै नमः
627. ॐ परागतये नमः
628. ॐ हंसयुक्तविमानस्थायै नमः
629. ॐ हंसारूढायै नमः
630. ॐ शशिप्रभायै नमः ||630||
631. ॐ भवान्यै नमः
632. ॐ वासनाशक्त्यै नमः
633. ॐ आकृतिस्थाखिलायै नमः
634. ॐ अखिलायै नमः
635. ॐ तंत्रहेतवे नमः
636. ॐ विचित्रांग्यै नमः

637. ॐ व्योमगंगाविनोदिन्यै नमः
638. ॐ वर्षायै नमः
639. ॐ वार्षिकायै नमः
640. ॐ ऋग्यजुस्सामरूपिण्यै नमः ||640||
641. ॐ महानद्यै नमः
642. ॐ नदीपुण्यायै नमः
643. ॐ अगण्यपुण्यगुणक्रियायै नमः
644. ॐ समाधिगतलभ्यार्थायै नमः
645. ॐ श्रोतव्यायै नमः
646. ॐ स्वप्रियायै नमः
647. ॐ घृणायै नमः
648. ॐ नामाक्षरपरायै नमः
649. ॐ उपसर्गनखांचितायै नमः
650. ॐ निपातोरुद्वयीजंघायै नमः ||650||
651. ॐ मातृकायै नमः
652. ॐ मंत्ररूपिण्यै नमः
653. ॐ आसीनायै नमः
654. ॐ शयानायै नमः
655. ॐ तिष्ठंत्यै नमः
656. ॐ धावनाधिकायै नमः
657. ॐ लक्ष्यलक्षणयोगाढ्यायै नमः
658. ॐ तादृप्यगणनाकृतयै नमः
659. ॐ एकरूपायै नमः
660. ॐ नैकरूपायै नमः ||660||
661. ॐ तस्यै नमः
662. ॐ इंदुरूपायै नमः
663. ॐ तदाकृतये नमः
664. ॐ समासतद्धिताकारायै नमः
665. ॐ विभक्तिवचनात्मिकायै नमः

666. ॐ स्वाहाकारायै नमः
667. ॐ स्वधाकारायै नमः
668. ॐ श्रीपत्यर्धांगनंदिन्यै नमः
669. ॐ गंभीरायै नमः
670. ॐ गहनायै नमः ||670||
671. ॐ गुह्यायै नमः
672. ॐ योनिलिंगार्धधारिण्यै नमः
673. ॐ शेषवासुकिसंसेव्यायै नमः
674. ॐ चपलायै नमः
675. ॐ वरवर्णिन्यै नमः
676. ॐ कारुण्याकारसंपत्तये नमः
677. ॐ कीलकृते नमः
678. ॐ मंत्रकीलिकायै नमः
679. ॐ शक्तिबीजात्मिकायै नमः
680. ॐ सर्वमंत्रेष्टायै नमः ||680||
681. ॐ अक्षयकामनायै नमः
682. ॐ आग्नेय्यै नमः
683. ॐ पार्थिवायै नमः
684. ॐ आप्यायै नमः
685. ॐ वायव्यायै नमः
686. ॐ व्योमकेतनायै नमः
687. ॐ सत्यज्ञानात्मिकानंदायै नमः
688. ॐ ब्राह्म्यै नमः
689. ॐ ब्रह्मणे नमः
690. ॐ सनातन्यै नमः ||690||
691. ॐ अविद्यावासनायै नमः
692. ॐ मायाप्रकृतये नमः
693. ॐ सर्वमोहिन्यै नमः
694. ॐ शक्तये नमः

695. ॐ धारणशक्तये नमः
696. ॐ चिदचिच्छक्तियोगिन्यै नमः
697. ॐ वक्त्रारुणायै नमः
698. ॐ महामायायै नमः
699. ॐ मरीचये नमः
700. ॐ मदमर्दिन्यै नमः ||700||
701. ॐ विराजे नमः
702. ॐ स्वाहायै नमः
703. ॐ स्वधायै नमः
704. ॐ शुद्धायै नमः
705. ॐ निरुपास्तये नमः
706. ॐ सुभक्तिगायै नमः
707. ॐ निरूपिताद्वयीविद्यायै नमः
708. ॐ नित्यानित्यस्वरूपिण्यै नमः
709. ॐ वैराजमार्गसंचारायै नमः
710. ॐ सर्वसत्पथदर्शिन्यै नमः ||710||
711. ॐ जालंधर्यै नमः
712. ॐ मृडान्यै नमः
713. ॐ भवान्यै नमः
714. ॐ भवभंजन्यै नमः
715. ॐ त्रैकालिकज्ञानतंतवे नमः
716. ॐ त्रिकालज्ञानदायिन्यै नमः
717. ॐ नादातीतायै नमः
718. ॐ स्मृतये नमः
719. ॐ प्रज्ञायै नमः
720. ॐ धात्रीरूपायै नमः ||720||
721. ॐ त्रिपुष्करायै नमः
722. ॐ पराजितायै नमः
723. ॐ विधानज्ञायै नमः

724. ॐ विशेषितगुणात्मिकायै नमः
725. ॐ हिरण्यकेशिन्यै नमः
726. ॐ हेमब्रह्मसूत्रविचक्षणायै नमः
727. ॐ असंख्येयपरार्धांतस्वरव्यंजनवैखर्यै नमः
728. ॐ मधुजिह्वायै नमः
729. ॐ मधुमत्यै नमः
730. ॐ मधुमासोदयायै नमः ||730||
731. ॐ मधवे नमः
732. ॐ माधव्यै नमः
733. ॐ महाभागायै नमः
734. ॐ मेघगंभीरनिस्वनायै नमः
735. ॐ ब्रह्मविष्णुमहेशादिज्ञातव्यार्थविशेषगायै नमः
736. ॐ नाभौवह्निशिखाकारायै नमः
737. ॐ ललाटेचंद्रसन्निभायै नमः
738. ॐ भ्रूमध्येभास्कराकारायै नमः
739. ॐ हृदिसर्वताराकृतये नमः
740. ॐ कृत्तिकादिभरण्यंत नक्षत्रेष्ट्यर्चितोदयायै नमः ||740||
741. ॐ ग्रहविद्यात्मिकायै नमः
742. ॐ ज्योतिषे नमः
743. ॐ ज्योतिर्विदे नमः
744. ॐ मतिजीविकायै नमः
745. ॐ ब्रह्मांडगर्भिण्यै नमः
746. ॐ बालायै नमः
747. ॐ सप्तावरणदेवतायै नमः
748. ॐ वैराजोत्तमसाम्राज्यायै नमः
749. ॐ कुमारकुशलोदयायै नमः
750. ॐ बगलायै नमः ||750||
751. ॐ भ्रमरांबायै नमः
752. ॐ शिवदूत्यै नमः

753. ॐ शिवात्मिकायै नमः
754. ॐ मेरुविंध्यातिसंस्थानायै नमः
755. ॐ काश्मीरपुरवासिन्यै नमः
756. ॐ योगनिद्रायै नमः
757. ॐ महानिद्रायै नमः
758. ॐ विनिद्रायै नमः
759. ॐ राक्षसाश्रितायै नमः
760. ॐ सुवर्णदायै नमः ||760||
761. ॐ महागंगायै नमः
762. ॐ पंचाख्यायै नमः
763. ॐ पंचसंहतये नमः
764. ॐ सुप्रजातायै नमः
765. ॐ सुवीरायै नमः
766. ॐ सुपोषायै नमः
767. ॐ सुपतये नमः
768. ॐ शिवायै नमः
769. ॐ सुगृहायै नमः
770. ॐ रक्तबीजांतायै नमः ||770||
771. ॐ हतकंदर्पजीविकायै नमः
772. ॐ समुद्रव्योममध्यस्थायै नमः
773. ॐ समबिंदुसमाश्रयायै नमः
774. ॐ सौभाग्यरसजीवातवे नमः
775. ॐ सारासारविवेकदृशे नमः
776. ॐ त्रिवल्यादिसुपुष्टांगायै नमः
777. ॐ भारत्यै नमः
778. ॐ भरताश्रितायै नमः
779. ॐ नादब्रह्ममयीविद्यायै नमः
780. ॐ ज्ञानब्रह्ममयीपरायै नमः ||780||
781. ॐ ब्रह्मनाड्यै नमः

782. ॐ निरुक्तये नमः
783. ॐ ब्रह्मकैवल्यसाधनायै नमः
784. ॐ कालिकेयमहोदारवीर्यविक्रमरूपिण्यै नमः
785. ॐ बडबाग्निशिखावक्त्रायै नमः
786. ॐ महाकबलतर्पणायै नमः
787. ॐ महाभूतायै नमः
788. ॐ महादर्पायै नमः
789. ॐ महासारायै नमः
790. ॐ महाक्रतवे नमः ||790||
791. ॐ पंचभूतमहाग्रासायै नमः
792. ॐ पंचभूताधिदेवतायै नमः
793. ॐ सर्वप्रमाणायै नमः
794. ॐ संपत्तये नमः
795. ॐ सर्वरोगप्रतिक्रियायै नमः
796. ॐ ब्रह्मांडांतर्बहिर्व्याप्तायै नमः
797. ॐ विष्णुवक्षोविभूषिण्यै नमः
798. ॐ शांकर्यै नमः
799. ॐ विधिवक्त्रस्थायै नमः
800. ॐ प्रवरायै नमः ||800||
801. ॐ वरहेतुक्यै नमः
802. ॐ हेममालायै नमः
803. ॐ शिखामालायै नमः
804. ॐ त्रिशिखायै नमः
805. ॐ पंचलोचनायै नमः
806. ॐ सर्वागमसदाचारमर्यादायै नमः
807. ॐ यातुभंजन्यै नमः
808. ॐ पुण्यश्लोकप्रबंधाढ्यायै नमः
809. ॐ सर्वांतर्यामिरूपिण्यै नमः
810. ॐ सामगानसमाराध्यायै नमः ||810||

811. ॐ श्रोत्रकर्णरसायनायै नमः
812. ॐ जीवलोकैकजीवातवे नमः
813. ॐ भद्रोदारविलोकनायै नमः
814. ॐ तडित्कोटिलसत्कांत्यै नमः
815. ॐ तरुण्यै नमः
816. ॐ हरिसुंदर्यै नमः
817. ॐ मीननेत्रायै नमः
818. ॐ इंद्राक्ष्यै नमः
819. ॐ विशालाक्ष्यै नमः
820. ॐ सुमंगळायै नमः ||820||
821. ॐ सर्वमंगळसंपन्नायै नमः
822. ॐ साक्षान्मंगळदेवतायै नमः
823. ॐ देहह्रद्दीपिकायै नमः
824. ॐ दीप्तये नमः
825. ॐ जिह्मपापप्रणाशिन्यै नमः
826. ॐ अर्धचंद्रोल्लसद्दंष्ट्रायै नमः
827. ॐ यज्ञवाटीविलासिन्यै नमः
828. ॐ महादुर्गायै नमः
829. ॐ महोत्साहायै नमः
830. ॐ महादेवबलोदयायै नमः ||830||
831. ॐ डाकिनीड्यायै नमः
832. ॐ शाकिनीड्यायै नमः
833. ॐ साकिनीड्यायै नमः
834. ॐ समस्तजुषे नमः
835. ॐ निरंकुशायै नमः
836. ॐ नाकिवंद्यायै नमः
837. ॐ षडाधाराधिदेवतायै नमः
838. ॐ भुवनज्ञाननिःश्रेणये नमः
839. ॐ भुवनाकारवल्लर्यै नमः

840. ॐ शाश्वत्यै नमः ||840||
841. ॐ शाश्वताकारायै नमः
842. ॐ लोकानुग्रहकारिण्यै नमः
843. ॐ सारस्यै नमः
844. ॐ मानस्यै नमः
845. ॐ हंस्यै नमः
846. ॐ हंसलोकप्रदायिन्यै नमः
847. ॐ चिन्मुद्रालंकृतकरायै नमः
848. ॐ कोटिसूर्यसमप्रभायै नमः
849. ॐ सुखप्राणिशिरोरेखायै नमः
850. ॐ सददृष्टप्रदायिन्यै नमः ||850||
851. ॐ सर्वसांकर्यदोषघ्न्यै नमः
852. ॐ ग्रहोपद्रवनाशिन्यै नमः
853. ॐ क्षुद्रजंतुभयघ्न्यै नमः
854. ॐ विषरोगादिभंजन्यै नमः
855. ॐ सदाशांतायै नमः
856. ॐ सदाशुद्धायै नमः
857. ॐ गृहच्छिद्रनिवारिण्यै नमः
858. ॐ कलिदोषप्रशमन्यै नमः
859. ॐ कोलाहलपुरस्थितायै नमः
860. ॐ गौर्यै नमः ||860||
861. ॐ लाक्षणिक्यै नमः
862. ॐ मुख्यायै नमः
863. ॐ जघन्याकृतिवर्जितायै नमः
864. ॐ मायायै नमः
865. ॐ विद्यायै नमः
866. ॐ मूलभूतायै नमः
867. ॐ वासव्यै नमः
868. ॐ विष्णुचेतनायै नमः

869. ॐ वादिन्यै नमः
870. ॐ वसुरूपायै नमः ||870||
871. ॐ वसुरत्नपरिच्छदायै नमः
872. ॐ छांदस्यै नमः
873. ॐ चंद्रह्रदयायै नमः
874. ॐ मंत्रस्वच्छंदभैरव्यै नमः
875. ॐ वनमालायै नमः
876. ॐ वैजयंत्यै नमः
877. ॐ पंचदिव्यायुधात्मिकायै नमः
878. ॐ पीतांबरमय्यै नमः
879. ॐ चंचत्कौस्तुभायै नमः
880. ॐ हरिकामिन्यै नमः ||880||
881. ॐ नित्यायै नमः
882. ॐ तथ्यायै नमः
883. ॐ रमायै नमः
884. ॐ रामायै नमः
885. ॐ रमण्यै नमः
886. ॐ मृत्युभंजन्यै नमः
887. ॐ ज्येष्ठायै नमः
888. ॐ काष्ठायै नमः
889. ॐ धनिष्ठांतायै नमः
890. ॐ शरांग्यै नमः ||890||
891. ॐ निर्गुणप्रियायै नमः
892. ॐ मैत्रेयायै नमः
893. ॐ मित्रविंदायै नमः
894. ॐ शेष्यशेषकलाशयायै नमः
895. ॐ वाराणसीवासलभ्यायै नमः
896. ॐ आर्यावर्तजनस्तुतायै नमः
897. ॐ जगदुत्पत्तिसंस्थानसंहारत्रयकारणायै नमः

898. ॐ तुभ्यं नमः
899. ॐ अंबायै नमः
900. ॐ विष्णुसर्वस्वायै नमः ||900||
901. ॐ महेश्वर्यै नमः
902. ॐ सर्वलोकानां जनन्यै नमः
903. ॐ पुण्यमूर्तये नमः
904. ॐ सिद्धलक्ष्म्यै नमः
905. ॐ महाकाळ्यै नमः
906. ॐ महालक्ष्म्यै नमः
907. ॐ सद्योजातादिपंचाग्निरूपायै नमः
908. ॐ पंचकपंचकायै नमः
909. ॐ यंत्रलक्ष्म्यै नमः
910. ॐ भवत्यै नमः ||910||
911. ॐ आदये नमः
912. ॐ आद्याद्यायै नमः
913. ॐ सृष्ट्यादिकारणाकारविततये नमः
914. ॐ दोषवर्जितायै नमः
915. ॐ जगल्लक्ष्म्यै नमः
916. ॐ जगन्मात्रे नमः
917. ॐ विष्णुपत्न्यै नमः
918. ॐ नवकोटिमहाशक्तिसमुपास्यपदांबुजायै नमः
919. ॐ कनत्सौवर्णरत्नाढ्यसर्वाभरणभूषितायै नमः
920. ॐ अनंतानित्यमहिष्यै नमः ||920||
921. ॐ प्रपंचेश्वरनायक्यै नमः
922. ॐ अत्युच्छ्रितपदांतस्थायै नमः
923. ॐ परमव्योमनायक्यै नमः
924. ॐ नाकपृष्ठगताराध्यायै नमः
925. ॐ विष्णुलोकविलासिन्यै नमः
926. ॐ वैकुंठराजमहिष्यै नमः

927. ॐ श्रीरंगनगराश्रितायै नमः
928. ॐ रंगनायक्यै नमः
929. ॐ भूपुत्र्यै नमः
930. ॐ कृष्णायै नमः ||930||
931. ॐ वरदवल्लभायै नमः
932. ॐ कोटिब्रह्मादिसंसेव्यायै नमः
933. ॐ कोटिरुद्रादिकीर्तितायै नमः
934. ॐ मातुलुंगमयं खेटं बिभ्रत्यै नमः
935. ॐ सौवर्णचषकं बिभ्रत्यै नमः
936. ॐ पद्मद्वयं दधानायै नमः
937. ॐ पूर्णकुंभं बिभ्रत्यै नमः
938. ॐ कीरं दधानायै नमः
939. ॐ वरदाभये दधानायै नमः
940. ॐ पाशं बिभ्रत्यै नमः ||940||
941. ॐ अंकुशं बिभ्रत्यै नमः
942. ॐ शंखं वहन्त्यै नमः
943. ॐ चक्रं वहन्त्यै नमः
944. ॐ शूलं वहन्त्यै नमः
945. ॐ कृपाणिकां वहन्त्यै नमः
946. ॐ धनुर्बाणौ बिभ्रत्यै नमः
947. ॐ अक्षमालां दधानायै नमः
948. ॐ चिन्मुद्रां बिभ्रत्यै नमः
949. ॐ अष्टादशभुजायै नमः
950. ॐ महाष्टादशपीठगायै नमः ||950||
951. ॐ भूमिनीलादिसंसेव्यायै नमः
952. ॐ स्वामिचित्तानुवर्तिन्यै नमः
953. ॐ पद्मायै नमः
954. ॐ पद्मालयायै नमः
955. ॐ पद्मिन्यै नमः

956. ॐ पूर्णकुंभाभिषेचितायै नमः
957. ॐ इंदिरायै नमः
958. ॐ इंदिराभाक्ष्यै नमः
959. ॐ क्षीरसागरकन्यकायै नमः
960. ॐ भार्गव्यै नमः ||960||
961. ॐ स्वतंत्रेच्छायै नमः
962. ॐ वशीकृतजगत्पतये नमः
963. ॐ मंगळानांमंगळाय नमः
964. ॐ देवतानांदेवतायै नमः
965. ॐ उत्तमानामुत्तमायै नमः
966. ॐ श्रेयसे नमः
967. ॐ परमामृतायै नमः
968. ॐ धनधान्याभिवृद्धये नमः
969. ॐ सार्वभौमसुखोच्छ्रयायै नमः
970. ॐ आंदोळिकादिसौभाग्यायै नमः ||970||
971. ॐ मत्तेभादिमहोदयायै नमः
972. ॐ पुत्रपौत्राभिवृद्धये नमः
973. ॐ विद्याभोगबलादिकायै नमः
974. ॐ आयुरारोग्यसंपत्तये नमः
975. ॐ अष्टैश्वर्यायै नमः
976. ॐ परमेशविभूतये नमः
977. ॐ सूक्ष्मात्सूक्ष्मतरागतये नमः
978. ॐ सदयापांगसंदत्तब्रह्मेंद्रादिपदस्थितये नमः
979. ॐ अव्याहतमहाभाग्यायै नमः
980. ॐ अक्षोभ्यविक्रमायै नमः ||980||
981. ॐ वेदानाम्समन्वयायै नमः
982. ॐ वेदानामविरोधायै नमः
983. ॐ निःश्रेयसपदप्राप्तिसाधनायै नमः
984. ॐ निःश्रेयसपदप्राप्तिफलायै नमः

985. ॐ श्रीमंत्रराजराज्ञ्यै नमः

986. ॐ श्रीविद्यायै नमः

987. ॐ क्षेमकारिण्यै नमः

988. ॐ श्रीं बीज जपसंतुष्टायै नमः

989. ॐ ऐं ह्रीं श्रीं बीजपालिकायै नमः

990. ॐ प्रपत्तिमार्गसुलभायै नमः ||990||

991. ॐ विष्णुप्रथमकिंकर्यै नमः

992. ॐ क्लींकारार्थसावित्र्यै नमः

993. ॐ सौमंगळ्याधिदेवतायै नमः

994. ॐ श्रीषोडशाक्षरीविद्यायै नमः

995. ॐ श्रीयंत्रपुरवासिन्यै नमः

996. ॐ सर्वमंगळमांगळ्यायै नमः

997. ॐ सर्वार्थसाधिकायै नमः

998. ॐ शरण्यायै नमः

999. ॐ त्र्यंबकायै नमः

1000. ॐ नारायण्यै नमः ||1000||

|| इति श्री लक्ष्मी सहस्रनामावळिः संपूर्णं ||